हस्तिगिरिः, पुं, (हस्तिप्रधानो गिरिर्यत्र ।) काञ्चिदेशः । इति केचित् ॥

हस्तिघोषा, स्त्री, (हस्तीव बृहती घोषा ।) बृहद्घोषा । बड़ी तोरई इति हिन्दी भाषा । तत्पर्य्यायः । ऐभी २ महत्पुष्पा ३ सपीतिका ४ महाकोषातकी ५ । अस्या गुणाः । स्निग्धत्वम् । सारकत्वम् । पित्तानिलनाशित्वञ्च । इति मदनविनोदः ॥ (पर्य्यायान्तरं यथा,—

"महाकोषातकी घोषा हस्तिघोषा महाफला । धामार्गवो घोषकश्च हस्तिपर्णश्च स स्मृतः ॥"

इति भावप्रकाशस्य पूर्व्वखण्डे प्रथमे भागे ॥)

हस्तिघोषातकी, स्त्री, (हस्तीव बृहती घोषातकी ।) हस्तिघोषा । इति रत्नमाला ॥ (गुणादिकमस्या हस्तिघोषाशब्दे ज्ञातव्यम् ॥)

हस्तिघ्नः, पुं, (हस्तिनं हन्तुं शक्तः । हस्तिन् + हन + "शक्तौ हस्तिकपाटयोः ।" ३ । २ । ५४ । इति टक् ।) मनुष्यः । इति केचित् ॥ करिनाशके, त्रि ॥

हस्तिचारिणी, स्त्री, (हस्तीव चरतीति । चर + णिनिः । ङीप् ।) महाकरञ्जः । इति राजनिर्घण्टः ॥

हस्तिदन्तं, क्ली, (हस्तिनो दन्त इव आकारोऽस्यास्तीति । अच् ।) मूलकम् । इति राजनिर्घण्टः ॥

हस्तिदन्तः, पुं, (हस्तिनो दन्त इव आकारोऽस्य । अच् ।) मूलकम् । इति शब्दरत्नावली ॥ (हस्तिनो दन्त इव ।) द्रव्यरक्षार्थंभित्तिस्थकीलकः । (हस्तिनो दन्तः) गजदशनश्च ॥ (यथा,—

"हस्तिदन्तमसीं कृत्वा मुख्यञ्चैव रसाञ्जनम् । लोमान्यनेन जायन्ते मूर्णां पाणितलेष्वपि ॥"

इति वैद्यकचक्रपाणिसंग्रहे क्षुद्ररोगाधिकारे ॥)

हस्तिदन्तकं, क्ली, (हस्तिदन्तमेव । कन् ।) मूलकम् । इति शब्दमाला ॥ (मूलकशब्देऽस्य गुणादयो ज्ञातव्याः ॥)

हस्तिदन्तफला, स्त्री, (हस्तिदन्त इव फलमस्याः ।) एर्व्वारुः । इति राजनिर्घण्टः ॥

हस्तिद्वयसः, त्रि, गजपरिमाणम् । हस्तिशब्दात् द्वयसच्प्रत्ययेन निष्पन्नः । इति सिद्धान्तकौमुदी ॥

हस्तिनखः, पुं, (हस्तिनो नख इव ।) पुरद्वारि यत् कूटं तत् । इत्यमरः । २ । २ । १७ ॥ द्वारोपरि दुर्गार्थं यत् कूटं हस्तिकाराशिस्तस्मिन् हस्तिनखो दमदमा इति ख्यातः । दुर्गद्वारावरणार्थः क्रमनिम्नोन्नतखातोद्धृतमृत्कूटो हस्तिनख इत्यन्योऽपि । दुर्गपुरद्वारसमीपे युद्धार्थं यद्वहिस्तटमन्तःसोपानयुक्तं मृत्कूटं यत्र स्थित्वा विपक्षेषु काष्ठादिकं क्षिप्यते तत्र हस्तिनखो दुरुज इति ख्यात इत्यपरे । हस्तिनो नख इव हस्तिनखः । इति तट्टीकायां भरतः । (यथा, माघे । ३ । ६८ ।

"शनैरनीयन्त रयात् पतन्तो
रथाः क्षितिं हस्तिनखादखेदैः ।
सयत्नसूतायतरश्मिभुग्न-
ग्रीवाग्रसंसक्तयुगैस्तुरङ्गैः ॥")

हस्तिनपुरं, क्ली, हस्तिनापुरम् । इति हेमचन्द्रः ॥

हस्तिनापुरं, क्ली, चन्द्रवंशीयहस्तिनामकराजनिर्म्मितनगरम् । परिक्षितगड़ इति दिल्ली इति च ख्यातम् । तत्पर्य्यायः । नागाह्वः २ हस्तिनपुरम् ३ हास्तिनम् ४ गजाह्वयम् ५ गजाह्वम् ६ गजसाह्वयम् ७ । इति शब्दरत्नावली ॥ हस्तिनीपुरम् ८ । इति हेमचन्द्रः । शतानीकादप्यश्वमेधदत्तो भविता । तस्मादप्यधिसीमकृष्णः । अधिसीमकृष्णात् निचक्नुः । यो गङ्गापहृते हस्तिनापुरे कौशाम्ब्यां निवत्स्यति । इति विष्णुपुराणे ४ अंशे २१ । ३ ॥

हस्तिनी, स्त्री, (हस्तिनः स्त्री । ङीप्) गजपत्नी । हातिनी इति भाषा । तत्पर्य्यायः । करेणूः २ करेणुः ३ रेणुका ४ करेणुका ५ धेनुका ६ वाशिता ७ वाशा ८ करिणी ९ विशा १० । इति शब्दरत्नावली ॥ कटम्भरा ११ पुष्करिणी १२ वशा १३ वसा १४ गणिका १५ गजयोषित् १६ । इति जटाधरः ॥ इभी १७ पद्मिनी १८ मातङ्गी १९ । अस्या दुग्धगुणाः । मधुरत्वम् । कषायत्वम् । गुरुत्वम् । कषायत्वम् । स्निग्धत्वम् । स्थैर्य्यकरत्वम् । शीतत्वम् । चक्षुष्यत्वम् । बलवर्द्धनत्वञ्च ॥ तद्दधिगुणाः । कषायत्वम् । लघुत्वम् । उष्णत्वम् । पक्तिशूलशमनत्वम् । रुचिप्रदत्वम् । दीप्तिदत्वम् । बलासगदनाशित्वम् । वीर्य्यवर्द्धनत्वम् । उत्तमबलप्रदत्वञ्च ॥ तन्नवनीतगुणाः । कषायत्वम् । शीतलत्वम् । लघुत्वम् । तिक्तत्वम् । विष्टम्भिजन्तुपित्तकफक्रमिनाशित्वञ्च ॥ तद्घृतगुणाः । कफपित्तविषक्रमिनाशित्वम् । कषायत्वम् । विष्टम्भित्वम् । तिक्तत्वम् । अग्निकरत्वञ्च । इति राजनिर्घण्टः ॥ * ॥ चतुर्व्विधस्त्रीमध्ये स्त्रीविशेषः । तल्लक्षणं यथा,—

"स्थूलाधरा स्थूलनितम्बभागा
स्थूलाङ्गुली स्थूलकुचा सुशीला ।
कामोत्सुका गाढ़रतिप्रिया च
नितम्बखर्व्वा खलु हस्तिनी स्यात् ॥"

इति रतिमञ्जरी ॥

इहविलासिनी । इति शब्दचन्द्रिका ॥

हस्तिनीपुरं, क्ली, हस्तिनापुरम् । इति हेमचन्द्रः ॥

हस्तिपः, पुं, (हस्तिनं पाति रक्षतीति । पा + कः ।) हस्त्यारोहः । इति शब्दमाला ॥ (यथा, मार्कण्डेये । ३९ । १८ ॥

"वश्यं मत्तं यथेच्छातो नागं नयति हस्तिपः । तथैव योगी स्वच्छन्दः प्राणं नयति साधितम् ॥")

हस्तिपकः, पुं, (हस्तिप एव । कन् ।) गजारोहः । माहुत इति भाषा । तत्पर्य्यायः । आधोरणः २ हस्त्यारोहः ३ निषादी ४ । इत्यमरः । २ । ८ । ५९ ॥ आधी पालको परो योद्धारावित्ति केचित् । इति भरतः ॥ (यथा, माघे । ५ । ४९ ।

"जह्रे जनैर्मुकुलिताक्षमनाददाने
संरब्धहस्तिपकनिष्ठुरचोदनाभिः ।
गम्भीरवेदिनि पुरः कवलं करीन्द्रे
मन्दोऽपि नाम न महानवगृह्य साध्यः ॥")

हस्तिपत्रः, पुं, (हस्तिनः कर्ण इव पत्रमस्य ।) हस्तिकन्दः । इति राजनिर्घण्टः ॥

हस्तिपर्णिका, स्त्री, (हस्तिनः कर्ण इव पर्णमस्याः कन् । टापि अत इत्वम् ।) राजकोषातकी । इति राजनिर्घण्टः ॥

हस्तिपर्णी, स्त्री, (हस्तिनः पर्णमिव पर्णमस्याः । ङीष् ।) मोरटालता । इति रत्नमाला ॥ कर्कटी । इति राजनिर्घण्टः ॥

हस्तिमदः, पुं, (हस्तिनो मदः ।) करिगण्डक्षरितमदजलम् । तत्पर्य्यायः । गजमदः २ गजदानम् ३ मदः ४ कुम्भिमदः ५ दन्तिमदः ६ दानम् ७ द्विपमदः ८ । अस्य गुणाः । स्निग्धत्वम् । तिक्तत्वम् । केश्यत्वम् । अपस्मारविषकुष्ठकण्डूतिव्रणदद्रुविसर्पनाशित्वञ्च । इति राजनिर्घण्टः ॥

हस्तिमल्लः, पुं, (हस्तिषु मल्लः ।) गणेशः । शङ्खनागः । ऐरावतः । इति मेदिनी ॥

हस्तिरोहणकः, पुं, (हस्तीव रोहते इति । रुह + ल्युः । ततः कन् ।) महाकरञ्जः । इति राजनिर्घण्टः ॥

हस्तिलोध्रकः, पुं, (हस्तीव महान् लोध्रः । ततः कन् ।) लोध्रः । इति राजनिर्घण्टः ॥

हस्तिवाहः, पुं, (हस्तिनं वाहयतीति । वह + णिच् + अण् ।) अङ्कुशः । इति शब्दरत्नावली ॥ गजवाहकश्च ॥

हस्तिविषाणी, स्त्री, कदली । इति राजनिर्घण्टः ॥ (विवरणमस्याः कदलीशब्दे ज्ञातव्यम् ॥)

हस्तिशाला, स्त्री, (हस्तिनः शाला ।) गजगृहम् । फीलखाना इति पारस्यभाषा । तत्पर्य्यायः । चतुरम् २ । इति हेमचन्द्रः ॥

हस्तिशुण्डा, } स्त्री, (हस्तिनः शुण्ड इव आकारो-
हस्तिशुण्डी, } ऽस्त्यस्येति । अच् । विभाषया ङीष् ।) क्षुपविशेषः । हातिशुँड़ा इति भाषा । तत्पर्य्यायः । हस्तिनी २ भुरुण्डी ३ जलेश्वया ४ । इति शब्दचन्द्रिका ॥ नागशुण्डी ५ शुण्डी ६ धूसरपत्रिका ७ । (पर्य्यायान्तरं यथा, "हस्तिशुण्डी चातिविषा क्रूरघ्नं हेममाक्षिकम् ॥" इति वैद्यकरसेन्द्रसारसंग्रहे ज्वराधिकारे ॥) अस्या गुणाः । कटुत्वम् । उष्णत्वम् । सन्निपातज्वरनाशित्वञ्च । इति राजनिर्घण्टः ॥ करिकरे, पुं ॥

हस्तिश्यामाकः, पुं, (हस्तीव स्थूलः श्यामाकः ।) शस्यविशेषः । हातियाश्यामा इति भाषा । अस्य गुणाः । धातुशोषणत्वम् । पित्तश्लेष्मनाशित्वम् । वायुवर्द्धनत्वम् । रूक्षत्वञ्च । इति राजवल्लभः ॥

हस्ती, [न्] पुं, सुहोत्रराजपुत्रः । यथा । बृहत्क्षत्रस्य सुहोत्रः पुत्रः सुहोत्राद्धस्ती य इदं हस्तिनापुरं निर्म्मापयामास । इति विष्णुपुराणे ४ अंशे १९ अध्यायः ॥ अपि च ।